IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# पूर्वादिदिक्षुद्वारफलम्

**डॉ. सोनू शर्मा**

**गाँव-कनौह, जिला-हिसार, हरियाणा**

नवगुणसूत्रविभक्तान्येकाशीतिपदे नृपादीनां विप्रादिवर्णानां च द्वाराणि कार्याणि यथा चमतसृष्वपि दिक्षु नवगुणसूत्रविभक्तानि तत्र फल प्रतिपादने प्रत्येकदिशि अष्टानां देवतानां स्थानेषु अष्टद्वाराणि जायन्ते सर्वयोगेन द्वात्रिंशद् द्वाराणि सन्ति । तेषामाचार्येण समाससंहिता फलनिर्देशो देवतात्मकः एव कृतः ।

उक्तञ्च-

**नवगुणसूत्रविभक्तान्यष्ट गुणेनाथवा चतुषष्टेः ।**

**द्वाराणि यानि तेषामनलादीनां फलोपनयः ॥**[1]

पूर्वभागे आरम्भः ईशानात् करणीयम् तथाच दक्षिणभागस्य आरम्भः आग्नेयकोणात् करणीयम्। पश्चिमभागस्य आरम्भः नैऋत्यकोणात् करणीयं तथा च उत्तरभागस्य आरम्भः वायव्यकोणात् करणीयम् । उक्तञ्च

**पूर्वाण्यैशान्यां याम्याग्नेय्यां दक्षिणानि जानीयात्।**

**द्वाराणि नैऋत्यादीनि पश्चिमान्युत्तराणि वायोश्च ॥**[2]

---

[1] वास्तुसौख्यम् पृ सं. 112

[2] वास्तुसार पृ सं. 135

**पूर्वदिशिद्वारफलम् -**

पूर्वदिशि अष्टभागेषु द्वारकल्पनया प्रथमशिखिभागे अनलभयं द्वितीयभागे पर्जन्ये स्त्रीजनने भागे जयन्तभागे विराम, चतुर्थ इन्द्रभागे राजप्रियपात्रता पञ्चमे सूर्य क्रोधवृद्धि, समयाव्यवहारः सप्तमे भूरो क्रूरता, अष्टमे अन्तरिक्षे तस्करभयं भवति। यथोक्तं वास्तुसारसंग्रहे-

**अनलभयं स्वीजननं प्रभूतधनता नरेन्द्रवाल्लभ्यम्।**

**क्रोधपरानृत्यं क्रौर्य चौर्य च पूर्वेण।**[3]

**पश्चिमदिशिद्वारफलम्-**

पश्चिमे प्रथमभागे यदि द्वारं कुर्वन्ति चेत् तदा पुत्रव्यथा (सुतपोडा) भवति । द्वितीयभागे द्वारस्य निर्माणं कुर्वन्ति तदा शत्रुवृद्धिः जायते। तृतीयभागे सुग्रीवे यदि द्वारस्य निर्माणं कुर्वन्ति चेत् तदा पुत्रधनप्राप्तिः भवति। चतुर्थभागे कुसुमदन्तेः यदि द्वारस्य निर्माणं भवति तदा पुत्रधनफलसम्पत्तेः अभिवृद्धि तथा च पञ्चमभागे वरुणे यदि द्वारस्य निर्माण भवति तदा धनप्राप्तिर्भवति । पष्ठभागे असुरस्यभागे यदि गृहस्य द्वारस्य निर्माण कुर्वन्ति चेत् तदा राजभयः भवति । सप्तमभागे शोषस्यभागे यदि द्वारस्य निर्माणं कुर्वन्ति चेत्तदा धनक्षयः भवति तथा च अष्टमभागे द्वारस्य निर्माणं भवति तदा रोगभयः भवति। यथोक्तम्-

**सुतपीडा रिपुवृद्धिः सुतधनप्राप्तिः सुतार्थफलसम्पत् ।**

**धनसम्पन्नृपतिभयं धनक्षयो रोग इत्यपरे ।।**[4]

वास्तुसारे कथितम् अस्ति यत् पश्चिमदिशाया: प्रथमभागे द्वारस्य निर्माण कुर्वन्ति चेत् तदा निर्धनं भवति । द्वितीयभागे द्वारनिर्माणं स्त्रीदुःखं भवति तृतीयभागे द्वारस्य निर्माणात् लक्ष्मीप्राप्तिः भवति तथा च चतुर्थभागे द्वारस्य निर्माणं कुर्वन्ति तदा धनागमः जायते। पञ्चमभागे द्वारस्य निर्माणात् सौभाग्यः भवति । षष्ठभागे द्वारस्य निर्माणात् धनलाभः भवति । सप्तमभागे द्वारस्य निर्माण कुर्वन्ति चेत् तदा दुःखं भवति तथा च अष्टमभागे द्वारस्य निर्माणं कुर्वन्ति तदा शोकभयः भवति । यथोक्तम्

**निःस्वं स्त्रीदुःख्योगश्च लक्ष्मीप्राप्तिर्धनागमः**

**सौभाग्यं धनलाभश्च दुःखं शोकश्च पश्चिमे ॥**[5]

---

[3] वास्तुसार संग्रह पृ सं. 143

[4] वास्तुसौख्यम् पृ सं. 113

**उत्तरदिशिद्वारम्**

उत्तरे प्रथमभागे यदि द्वारस्य निर्माणं भवति तदा वधबन्धनं भवति तथा च द्वितीयभागे द्वारस्य निर्माणात् शत्रुवृद्धिः जायते । तृतीयभागे मुख्यभागे यदि द्वारस्य निर्माणं कुर्वन्ति चेत् तदा धनलाभः भवति तथा च चतुर्थभागे भल्लाटे यदि द्वारस्य निर्माणं भवति तदा शौर्यादयः गुणसम्पत्तेः प्राप्तिर्भवति । पञ्चमभागे सौम्ये यदि द्वारस्य निर्माणं भवति तदा पुत्रलाभः तथा च षष्ठभागे भुजङ्गे द्वारस्य निर्माणात् सुतेन वैरः भवति । सप्तमभागे यदि द्वारस्य निर्माणं कुर्वन्ति चेत् तदा स्त्रीदोषः उत्पन्नं भवति तथा च अष्टमभागे दितौ द्वारस्य निर्माणं भवति तदा निधनं भवति । उक्तञ्च-

**वधबन्धो रिपुवृद्धिः सुतधनलाभः समस्तगुणसम्पत्।**
**पुत्रधनप्राप्तिर्वैरं सुतेन दोषाः स्त्रिया नैस्व्यम् ॥**[6]

वास्तुसारे कथितम् अस्ति यत् उत्तरदिशायाः प्रथमभागे यदि द्वारस्य निर्माण कुर्वन्ति चेत् तदा शत्रुणां वृद्धिः भवति । द्वितीयभागे यदि द्वारस्य निर्माणं कुर्वन्ति चेत् तदा दुखं भवति। तृतीयभागे द्वारस्य निर्माणात् हानिर्भवति तथा च चतुर्थभागे सम्पत्तेः प्राप्तिर्भवति पञ्चमभागे यदि द्वारस्य निर्माणं भवति तदा सुखागमः जायते तथा च षष्ठभागे द्वारस्य निर्माणं कुर्वन्ति चेत् तदा शोकः भवति तथा च अष्टमभागे यदि द्वारस्य निर्माणं भवति तदा बाधा भवति । उक्तञ्च-

**शत्रुवृद्धिर्महद्दुःखं हानिः संपत्सुखागमः ।**
**प्राप्तदुःखं शोकबाधा चोत्तरस्यां दिशि क्रमात् ॥**[7]

**दक्षिणदिशिद्वारम् -**

दक्षिणे प्रथमभागे अनिलभागे यदि द्वारस्य निर्माणं कुर्वन्ति चेत् तदा अल्पसुतः भवति तथा च द्वितीयभागे पौष्णभागे यदि द्वारस्य निर्माणं भवति तदा प्रैष्यं भवति । तृतीयभागे वितथभागे द्वारस्य निर्माणात् नीचकर्मप्रवृत्तिः भवति तथा च चतुर्थभागे द्वारस्य निर्माणात् सुभक्ष्य, सुपानं एवं सुतवृद्धिः भवति । पञ्चमभागे यम भागे द्वारस्य निर्माणं भवति तदा अशुभः भवति तथा च षष्ठभागे गन्धर्वस्य भागे यदि द्वारस्य निर्माणं भवति तदा कृतघ्नता जायते।

---

[5] वास्तुसार पृ सं. 166
[6] वास्तुसौख्यम् पृ सं. 113
[7] वास्तुसार पृ सं. 166

सप्तमभागे भृङ्गराजे यदि द्वारस्य निर्माणं कुर्वन्ति चेत् तदा निर्धनं भवति तथा च अष्टमभागे मृगभागे यदि द्वारस्य निर्माणं भवति तदा पुत्रबलनाशः भवति। उक्तञ्च-

**अल्पसुतत्वं प्रैष्यं नीचत्वं भक्ष्यपानसुतवृद्धि।**

**रौद्रं कृतघ्नमधनं सुतवीर्यघ्नं च याम्येन ।।**[8]

वास्तुसारे कथितम् अस्ति यत् दक्षिणदिशायाः प्रथमभागे यदि द्वारस्य निर्माणं कुर्वन्ति चेत् तदा मरणं भवति तथा च द्वितीयभागे यदि द्वारस्य निर्माण भवति तदा बन्धनं भवति। तृतीयभागे द्वारस्य निर्माणात् भयं भवति तथा च चतुर्थभागे द्वारस्य निर्माणात् पुत्रप्राप्तिर्भवति। पञ्चमभागे यदि द्वारस्य निर्माणं भविष्यति तदा धनागमः भविष्यति तथा च यदि षष्ठभागे द्वारस्य निर्माण भविष्यति तदा यश प्राप्तिः भविष्यति। सप्तमभागे यदि द्वारस्य निर्माणं कुर्वन्ति चेत् तदा चोरभयं भवति तथा च यदि अष्टमभागे द्वारस्य निर्माणं भवति तदा रोगभयः भवति। यथोक्तम्-

**निधनं बोधनं भीतिः पुत्राप्राप्तिश्च धनागमः**

**यशोलब्धिश्चोरभयं व्याधिभीतिश्च दक्षिणे॥**[9]

पूर्वादिदिशायां वायुक्रमेण एकाशीति पदवास्तौ नव-नवभागेषु पूर्वदिशायाः ३,४ दक्षिणदिशायां ४, पश्चिमदिशि तथा च उत्तरदिशायां ३, ४, ५ एतेषु भागेषु मुख्यद्वारं धनधान्य तथा च सन्ततिवृद्धिकारकः भवति। यथोक्तम्

**द्वारं नवमभागेषु काग्रं वामात्प्रदक्षिणम्।**

**तृतीय-तूर्ययोः प्राच्यां याम्ये तुर्येऽथ पश्चिमे॥**

**त्रि- तुर्य - पञ्चमे चैव पञ्च वेद- त्रिषूत्तरे।**

**तत्र द्वारं च कर्तव्यं धनधान्यादि वृद्धये॥**[10]

---

[8] वास्तुसौख्यम् पृ सं. 112

[9] वास्तुसार पृ सं. 166

[10] वास्तुसारसंग्रह पृ सं. 141